# ॥ नारायणोपनिषत् अथवा नारायण अथर्वशीर्ष ॥
कृष्णयजुर्वेदीया

ओं सह नाववतु सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥
ओं शांतिः शांतिः शांतिः ॥
(प्रथमः खंडः
नारायणात् सर्वचेतनाचेतनजन्म)

ओं अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति ।
नारायणात्प्राणो जायते । मनः सर्वेंद्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।
नारायणाद् ब्रह्मा जायते । नारायणाद् रुद्रो जायते ।
नारायणादिंद्रो जायते । नारायणात्प्रजापतयः प्रजायंते ।
नारायणाद्द्वादशादित्या रुद्रा वसवः सर्वाणि च छंदाꣳसि ।
नारायणादेव समुत्पद्यंते । नारायणे प्रवर्तंते । नारायणे प्रलीयंते ॥
(एतदृग्वेदशिरोऽधीते ।)

(द्वितीयः खंडः
नारायणस्य सर्वात्मत्वं)

ओं । अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः ।
शक्रश्च नारायणः । द्यावापृथिव्यौ च नारायणः ।
कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वश्च नारायणः ।
अधश्च नारायणः । अंतर्बहिश्च नारायणः । नारायण एवेदꣳ सर्वं ।
यद्भूतं यच्च भव्यं । निष्कलो निरंजनो निर्विकल्पो निराख्यातः
शुद्धो देव एको नारायणः । न द्वितीयोऽस्ति कश्चित् । य एवं वेद ।
स विष्णुरेव भवति स विष्णुरेव भवति ॥
(एतद्यजुर्वेदशिरोऽधीते ।)

(तृतीयः खंडः
नारायणाष्टाक्षरमंत्रः)

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् ।
ओमित्येकाक्षरं । नम इति द्वे अक्षरे । नारायणायेति पंचाक्षराणि ।
एतद्वै नारायणस्याष्टाक्षरं पदं ।
यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवस्सर्वमायुरेति ।
विंदते प्राजापत्यꣳ रायस्पोषं गौपत्यं ।
ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । य एवं वेद ॥
(एतत्सामवेदशिरोऽधीते । ओं नमो नारायणाय)

(चतुर्थः खंडः
नारायणप्रणवः)

प्रत्यगानंदं ब्रह्मपुरुषं प्रणवस्वरूपं । अकार उकार मकार इति ।
तानेकधा समभरत्तदेतदोमिति ।
यमुक्त्वा मुच्यते योगी जन्मसंसारबंधनात् ।

# ॥ नारायणोपनिषत् अथवा नारायण अथर्वशीर्ष ॥
कृष्णयजुर्वेदीया

ओं नमो नारायणायेति मंत्रोपासकः । वैकुंठभुवनलोकं गमिष्यति ।
तदिदं परं पुंडरीकं विज्ञानघनं । तस्मात्तटिदाभमात्रं ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनों । ब्रह्मण्यो मधुसूदनयों
सर्वभूतस्थमेकं नारायणं । कारणरूपमकार परं ब्रह्मों ।
एतदथर्वशिरोयोधीते ॥
विद्याऽध्ययनफलं ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायमधीयानो दिवसकृतं पापं नाशयति ।
माध्यंदिनमादित्याभिमुखोऽधीयानः पंचमहापातकोपपातकात् प्रमुच्यते ।
सर्व वेद पारायण पुण्यं लभते ।
नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति ।
य एवं वेद । इत्युपनिषत् ॥
ओं सह नाववतु सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥
ओं शांतिः शांतिः शांतिः ॥
शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगं ।
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं
वंदे विष्णुं भवभयहरं सर्वलोकैकनाथं ॥